**ध्यानश्लोकाः –**

गुरुरेव गतिर्गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः मतिरस्ति गुरौ मां पाहि गुरो ।

अजं निर्विकल्पं निराकारमेकं निरानन्दमानन्दमद्वैतपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं परब्रह्मरूपं गणेशं भजेम ॥

पीताम्बरं करविराजितशङ्खचक्र-
कौमोदकी सरसिजं करुणासमुद्रं
राधा सहायम् अतिसुन्दरमन्दहासं
वातालयेशम् अनिशम् हृदि भावयामि ।

भूखण्डे केरलाख्ये सरितमिहनिलामुत्तरेणैवनावाक्षेत्रे
गव्यूतिमात्रे पुनरुपरिनवग्राम नाम्नि स्वधाम्नि ॥
धर्मिष्ठात् भट्टतन्त्राद्यखिलमतपटोः मातृदत्तद्विजेन्द्रात्
जातो नारयणाख्यो निरवहदतुलाम् देवनारायणाज्ञाम् ॥
मीमांसादिस्वतातान्निगममविकलं माधवाचार्यवर्यात्
तर्कंदामोदरार्यादपिपदपदवीम् अच्युतार्यात् बुधेन्द्रात् ॥
तेषां कारुण्ययोगात् किमपि सुकवितामाप्नुवं कर्ममेतत्
भूयात् कृष्णार्पणं मे भवतु च सततं धीरधारेः कथायाम् ।

श्रीहरये नमः श्रीहरये नमः श्रीहरये नमः
नारायणाखिलगुरो भगवन् नमस्ते ।